वर्षम् - ०२ अङ्कः - ०२ शोधज्योतिः
जनवरी-दिसम्बर, २०२० ISSN-2350-0700

# नागेशकृतायां परमलघुमञ्जूषाख्यः स्फोटनिरूपणम्

**हर्षलः भट्टः**[१]

## प्रास्ताविकम् -

**'स्फोट'**शब्दः सर्वप्रथमं पाणिनिकृतायाम् अष्टाध्याय्यां प्राप्यते। तत्र पाणिनिना **अवङ् स्फोटायनस्य**[२] इति सूत्रे स्फोटायननामकस्य ऋषेः उल्लेखः कृतः। पाणिनेः पूर्वं स्फोटायनेनैव सर्वप्रथमं स्फोटविषयस्य निरूपणं कृतमिति विद्वांसः मन्यन्ते। प्रतिकूलसमयवशाद् वा अन्य कारणवशात् स्फोटविषयः पाणिनिसमये प्रसिद्धिं नाप्राप्नोत् इति भवितुं शक्यते। तदनन्तरं पतञ्जलि-कात्यायन-भर्तृहरि-कौण्डभट्ट-नागेशभट्टादयः स्वग्रन्थे स्फोटविषयस्य पुनः प्रस्थापनं कृतवन्तः।

## स्फोटशब्दः -

वैयाकरण-तार्किक-मीमांसकाश्च स्फोटविषये बहुषु ग्रन्थेषु चर्चां कृतवन्तः। स्फोटशब्दस्य व्युत्पत्तिद्वयं कर्तुं शक्यते। **स्फुटति प्रकाशते अभिव्यज्यते वाऽर्थोऽनेन अस्माद् वा इति स्फोटः**। अर्थात् येन शब्देन अर्थस्य प्रकाशनं अभिव्यक्तिः वा भवति सः स्फोटः इति। अपरं च **स्फुटति अभिव्यज्यते वर्णैरिति स्फोटः।** अर्थात् वर्णैः यस्य अभिव्यक्तिः भवति सः स्फोटः। नागेशभट्टस्य तिस्रः मञ्जूषाः प्रसिद्धाः सन्ति। वैयाकरणसिद्धान्तमञ्जूषा, वैयाकरणसिद्धान्तलघुमञ्जूषा एवं वैयाकरणसिद्धान्तपरमलघुमञ्जूषा। तिसृष्वपि कृतिषु वैयाकरणानां राद्धान्तः स्फोटस्य निरूपणं दृश्यते एव। परन्तु परमलघुमञ्जूषायां तेन सरलं विस्तृतं च अस्य प्रतिपादनं कृतमस्ति। यतो हि स्फोटः वैयाकरणदर्शने शाब्दबोधाय मुख्यरूपेण प्रतिपादितः। अतः अस्य राद्धान्तस्य परमलघुमञ्जूषायां मङ्गलाचरणानन्तरं उपोद्घातरूपेण निरूपणं कृतमस्ति। यतो हि तेन स्फोटः अष्टधा निरूप्यते।

**अष्टौ स्फोटाः**

| **वर्णस्फोटः** | **पदस्फोटः** | **वाक्यस्फोटः** |
|---|---|---|
| वर्णजातिस्फोटः | पदजातिस्फोटः | वाक्यजातिस्फोटः |

---

[१] शोधच्छात्रः, महाराज-सयाजिराव-विश्वविद्यालयः,वडोदरा, गुजरातम्

[२] पाणिनीय-अष्टाध्यायी-सूत्रक्रमाङ्कः ६.१.१२३

| | | |
|---|---|---|
| वर्णव्यक्तिस्फोटः | अखण्डपदव्यक्तिस्फोटः<br>सखण्डपदव्यक्तिस्फोटः | सखण्डवाक्यव्यक्तिस्फोटः<br>अखण्डवाक्यव्यक्तिस्फोटः |

तेषु वाक्यस्फोट एव मुख्यः। किमर्थमिति चेत्, न केवलं पदेन वा वर्णेन अपि तु संपूर्णवाक्येनैव लोके निराकाङ्क्षरूपेण अर्थज्ञानं भवति। प्रतिवाक्यं सङ्केतग्रहः अर्थात् वाच्यवाचकसम्बन्धद्वारा वाक्यस्य अन्वाख्यानमशक्यम्। अतः पूर्वाचार्याः पदानि विभज्य तेषु प्रकृतिप्रत्ययभागान् प्रविभज्य तत्तत्पदानाम् अन्वयव्यतिरेकाभ्यां विभागान् कल्पयन्ति।

परमलघुमञ्जूषायां शक्तिनिरूपणानन्तरं **कोऽयं वृत्त्याश्रयः शब्दः?** इति प्रश्नमुत्थाप्य स्फोटनिरूपणं प्रारभ्यते। अत्र नागेशः मुख्यरूपेण मीमांसकनैयायिकानां मतं निरूप्य तस्य खण्डनं कृत्वा स्फोटरूपकं वैयाकरणसिद्धान्तं प्रस्थापयति।

## मीमांसकानां मतम् -

मीमांसकाः वर्णानां नित्यत्वं मन्यन्ते एवं च ते एव अर्थवाचकाः इति। अतः शाबरभाष्ये **गौः इत्यत्र कः शब्दः** इति प्रश्ने सति **गकारौकार विसर्जनीयाः** इति भगवान् उपवर्षः इति प्रतिपादितम्। तेषां मते यदि वर्णा एव अर्थवाचकाः भवेयुः तर्हि विकल्पद्वयम् अत्र उपस्थितं भवति।

(क) **शब्दे विद्यमानः प्रत्येकं वर्णः अर्थवाचको भवेत्।** परन्तु यदि प्रत्येकं वर्णः अभीष्टम् अर्थबोधं कारयिष्यति तर्हि प्रथमवर्णोच्चारणे एव शाब्दबोधो भवेत् एवं च द्वितीय-तृतीयवर्णानाम् उच्चारणस्य आवश्यकता एव न स्यात्। अतः शाब्दबोधे वर्णा अर्थवाचकाः न स्युः।

(ख) **वर्णसमुदायो वा सम्पूर्णं पदम् अर्थवाचको भवेदिति।** एवमपि भवितुं न शक्नोति । कथमिति चेत् वर्णस्य नित्यत्वपक्षे अभिव्यक्तिः एवं च अनित्यत्वपक्षे उत्पत्तिः क्षणात्मिका एव भवति। क्षणं तु कालस्य लघुतमं परिमाणम् एवं च न प्रत्यक्षयोग्यम्। अपरं च उच्चरित-प्रध्वंसिस्वभावात् वर्णानां समुदायः भवितुं न शक्नोति। यस्य वर्णसमुदायस्य वा पदस्य स्थितिः एव न सम्भवति सः कथम् अर्थवाचको भवेत्।

यस्मिन् क्षणे प्रथमवर्णस्य उच्चारणं भवति तत्क्षणात्मकमेव स वर्णः स्थितो भवति। द्वितीयवर्णोच्चारणावसरे स प्रथमवर्णः नष्टो भवति। एवं च अयं क्षणात्मकः कालः प्रत्यक्षयोग्यः न। इदमेव भाष्यकारः पतञ्जलिरपि स्वभाष्ये वक्ति - **एकैकवर्णवर्त्तिनी वाक् न द्वौ युगपदुच्चारयति। गौरिति**

**गकारे यावद् वाग्वर्तते, न औकारे, न विसर्जनीये। यावद् औकारे, न गकारे, न विसर्जनीये। यावद् विसर्जनीये न गकारे न औकारे। उच्चरितप्रध्वंसित्वात्। उच्चरितप्रध्वंसिनः खल्वपि वर्णाः।।**[१]

## नैयायिकानां मतम्-

अनन्तरं नागेशः तार्किकाणां पक्षं निरूप्य तेषामपि खण्डनं करोति। यत्तु तार्किकाः वर्णानाम् अनित्यत्वं स्वीकुर्वन्ति तदपि अर्थवाचकाः वर्णा एव इति तेषां मतम्। किमर्थमिति चेत् यदा **श्रोता प्रथमवर्णस्य उच्चारणं शृणोति तदा तस्य मनसि श्रुतस्य वर्णस्य संस्कारो जायते।** एतं स्मृतिरपि कथ्यते। परन्तु तन्न युक्तम्। यदा तैः प्रतिपादितं यत् वर्णा अनित्या एव अतः वर्णानां साक्षात् सत्ताया अभावे आद्योऽयं पूर्वोऽयम् इत्यादिव्यवहारो न सम्भवति। पूर्वोच्चरिते एवं च परे श्रूयमाणेषु वर्णेषु व्यवधानरहित उत्तरकालीनतासम्बन्धोऽपि न स्यात्।

अपरं च तार्किकाः पुनः **शब्दजशब्दन्यायेन पदस्य प्रत्यक्षज्ञानं कुर्वन्ति।** यथा भेरीवादनेन उत्पन्नो ध्वनिः वा शब्दः स्वनाशात् पूर्वं स्वसदृशम् अपरं शब्दम् उत्पादयति। एतादृशं यदा चरमवर्णस्य श्रवणं भविष्यति तदा तत्पूर्व वर्णानामपि श्रवणेन सम्पूर्णं पदं प्रत्यक्षं भविष्यति। परन्तु पदस्य साक्षात् विद्यमानाभावात् तदपि न युक्तम्। वर्णः अनित्य एव तर्हि कथं वर्णसमुदायरूपं पदमपि प्रत्यक्षरूपेण स्थास्यति। यदि एतस्मिन् अविद्यमाने पदे शक्तेः स्वीकारः कुर्मः चेत् **नष्टो घटो जलवान्** इत्यादि असङ्गतवाक्येष्वपि आपत्तिः न भवेत्।

तृतीयं च **पूर्व-पूर्ववर्णानां श्रवणेन उत्पन्नः अनुभवजन्यसंस्कारः चरमवर्णश्रवणेन शाब्दबोधं कारयति** । न्यायसिद्धान्तमुक्तावल्यामपि **तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेः।**[२] परन्तु एतदपि न युक्तम्। श्रोतुः बुद्धौ वर्णानाम् एकः विशिष्टः क्रमः भवति। अनेन तु कदाचित् क्रमविपर्ययेण **सरः** इति शब्दस्य **रसः** इत्यपि ज्ञानं भवितुं शक्नोति। **दीनः** इत्यस्य **नदी** इत्यपि ज्ञानं भवितुं शक्नोति अतः एतत् न शक्यम्।

## पतञ्जलेः कथनम् -

यदि नैयायिकानां मतानुसारेण उत्पत्तिविनाशधर्मवतां वर्णानां समुदाय एव पदमिति चेत् यदा एकस्य शब्दस्य यावत्संख्याम् आवृत्तिं करिष्यामः तावत् संख्याकाः नूतनाः शब्दाः मन्येयुः। यदि शतवारम् इन्द्रशब्दम् उच्चारयिष्यामः तर्हि शतसंख्यकाः भिन्न-भिन्न इन्द्रशब्दानां निरूपणस्य आवश्यकता भविष्यति। अस्यैव विरोधं कृत्वा महाभाष्ये पतञ्जलिः **- एक इन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत् सर्वयागेष्वङ्गं भवति** इति।

---

[१] व्याकरणमहाभाष्यम् । १.४.१०९

[२] न्यायसिद्धान्तमुक्तावली, शब्दखण्डः।

## वैयाकरणानां सिद्धान्तः -

वर्णः, पदं वा वृत्त्याश्रयी भूत्वा शाब्दबोधं न कारयति तर्हिः वृत्त्याश्रयः स शब्दः कः। अर्थात् कः शाब्दबोधं कारयति इति प्रश्ने सति नागेशः **स स्फोटात्मक गृहाण** इति वक्ति। अत्र चतुर्विधानां वाचां निरूपणमस्ति। ताः च **परा, पश्यन्ती, मध्यमा** एवं **वैखरी**। सर्वप्रथमं एतासां चतुर्विधानां वाचां निरूपणं भर्तृहरेः वाक्यपदीयस्य स्वोपज्ञटीकायां दृश्यते। यतो हि तेन परावाणी तु पश्यन्त्याः प्रकृष्टरूपमेव अस्ति इति प्रतिपादितम्।[1] एषा एव परावाणी महाभारते स्वरूपज्योतिः एवम् अनपायिनी अर्थात् स्वप्रकाशरूपा एवं नित्यरूपेण निर्दिष्टा।[2] अत्यन्तसूक्ष्मस्वरूपवशात् अस्या अपरं नाम **सूक्ष्मा** अपि अस्ति।

एतासु वाक्षु परावाणी शरीरस्य मूलाधारचक्रे पवनसंस्कारेण संस्कृता बिन्दुरूपेण स्थिता वर्तते। अत्र बिन्दोः अभिप्रायः **कारणबिन्दुः** इति। लघुमञ्जूषायां नागेशेन सृष्टिप्रक्रियायाः विस्तृतं वर्णनं कृतमस्ति। एषा वाणी (माया) एव ब्रह्मणः प्रेरणया कारणबिन्दोः स्थितिं प्राप्नोति एवं च कार्यबिन्दुः, नाद एवं च बीज इति त्रिरूपेण परिणता भवति। परावाण्याः विभाजनेनैव शब्दब्रह्मणः उत्पत्तिः भवति। स शब्द एव मूलाधारे वायुना सह सम्बद्धो भूत्वा परावाक् इति नाम प्राप्नोति।

पुनः सा वायुना अभिव्यक्ता मूलाधारतः नाभिपर्यन्तम् आगच्छता केवलं मनसः विषयीभूता **पश्यन्ती** इति कथ्यते। अर्थात् अस्यानुभवः केवलं मनसा एव कर्तुं शक्यते। एषा वाणी पदार्थानाम् अर्थानां च प्रकाशनं करोति। अत एव अस्या पश्यन्ती इति नामाभिधानं कृतमस्ति। परा एवं पश्यन्ती एतद्द्वयं वाग्ब्रह्म योगिनां निर्विकल्पक एवं सविकल्पसमाधेः विषयो भवति।

पुनः पश्यन्ती वाक् नाभितो हृदयम् आगत्य **मध्यमा** नाम्नाभिहिता भवति। वस्तुतः सामानजनानां कृते परा एवं पश्यन्ती सर्वथा अगम्या एव। एतस्यां स्थितौ वाचकः शब्दः तथा वाच्यः अर्थः इत्यनयोः पृथग्-रूपेण प्रतीतिः न भवति। अत एषा मध्यमा एव तत्तदर्थवाचक-शब्दस्फोटरूपा भवति। नागेशेन लघुमञ्जूषायां स्पष्टीकृतम् यत् **ततो हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशे अभिव्यक्त तत्तदर्थविशेषात्तत्तच्छब्द-विशेषोल्लेखिन्या बुद्ध्या विषयीकृता हिरण्यगर्भदेवत्या परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्यमावाक् इत्युच्यते।**[3] एषा अपि परश्रोत्रग्रहणायोग्या परन्तु कर्णपिधाने कृते सूक्ष्मवायोः अभिघातेन श्रूयमाणा भवति। अपरं च सा मध्यमा वक्तुः हृदये स्फुटिताः ये

---

[1] परं तु पश्यन्तीरूपम् अनपभ्रंशरहितम् एवं लोकव्यवहारातीतम्। (वाक्यपदीयम्)

[2] स्वरूपज्योतिरेवान्तः सूक्ष्मा वाग् अनपायिनी। उद्धृतं (वाक्यपदीयम्)

[3] वैयाकरणसिद्धान्तलघुमञ्जूषा, स्फोटनिरूपणम्

अर्थाः तेषामभिव्यक्तये तत्तच्छब्दानां निर्धारणकर्त्र्याः बुद्धेः विषयाः भवन्ति। इतोऽपि स्थूलदृष्ट्या सा अनभिव्यक्ता एव।

सा मध्यमा यदा मुखपर्यन्तमागत्य वक्तुः मुखेन अभिव्यक्ता भवति तदानीं सा **वैखरी** इति नाम प्राप्नोति। वैखरी-अवस्थायां वाण्याः अनन्तभेदाः भवन्ति। भर्तृहरिः वाक्यपदीयस्य स्वोपज्ञटीकायां तासां भेदान् निर्दिशति यथा - **श्लिष्टा व्यक्तवर्णसमुच्चारणा प्रसिद्धसाधुभावा भ्रष्टसंस्कारा च। तथा या अक्षे, या दुन्दुभौ, या वेणौ, या वीणायाम्, इत्यपरिमाणभेदा॥**[1] अर्थात् व्यक्ताव्यक्ता, साध्वपभ्रंशशब्दयुक्ता, दुन्दुभि-वेणु-वीणानां वादने सति उत्पन्ना ध्वनयः वैखर्याया एव प्रकाराः सन्ति। नागेशेन परमलघुमञ्जूषायां चतुर्विधायाः वाचः स्थानानि एवंरूपेण निर्दिष्टानि यत्-

**परावाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥**[2]

वैखर्या एवं मध्यमया च कृतः नाद एव श्रोतुः श्रवणविषयो भवति। मध्यमया कृतो नादः अर्थबोधक शब्दः यस्य अपरं नाम स्फोट इति तस्य व्यञ्जको भवति। वैखर्या उत्पन्नः नादः स्थूल एवं परश्रवणगोचरो भवति। परमलघुमञ्जूषायां यथा-

**वैखर्या हि कृतो नादः पर-श्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक इष्यते।।**

अतः वैयाकरणानां कृते अयं मध्यमानाद एव शब्दब्रह्म स्फोटव्यञ्जकश्च। मध्यमानादेनैव श्रोतारं शब्दार्थयोः पृथग्-रूपेण प्रतीतिः भवति। नागेशेन अस्याः मध्यमायाः केवलं परमलघुमञ्जूषायामेव शब्दब्रह्मरूपेण प्रतिपादनं कृतमस्ति। भर्तृहरिणा अपि वाक्यपदीये प्रथमकाण्डे आद्यैव शब्दब्रह्मणः निरूपणं कृतम्। यथा-

**अनादि-निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[3]

वैयाकरणानां दृष्ट्या यद्यपि स्फोटस्तु अखण्डः निरवयवः एक एव परन्तु मध्यमया वर्णरूपेण अभिव्यक्तः वर्णस्फोटः, पदरूपेणाभिव्यक्तः पदस्फोटः, वाक्यरूपेणाभिव्यक्त वाक्यस्फोटः। यथा रक्तवर्णे स्थितस्य रक्तत्वस्य कषायेऽपि संयोगसन्निकर्षेण अयं रक्तः इति प्रतीतिः भवति एवंरूपेण एकस्मिन्

---

[1] भर्तृहरेः वाक्यपदीयम्-कारिकासङ्ख्या - १३३

[2] वैयाकरणसिद्धान्तपरमलघुमञ्जूषा- स्फोटनिरूपणम्

[3] भर्तृहरेः वाक्यपदीयम्-कारिकासङ्ख्या - १

अखण्डस्फोटेऽपि अभिव्यङ्ग्य-अभिव्यञ्जकसम्बन्धेन वर्ण-पद-वाक्यादिव्यवहारः दृश्यते। भर्तृहरिणा अपि वाक्यपदीये यथा-

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।**
**वाक्यात् पदानामप्यन्तं प्रविवेको न कश्चन॥**[१]

यतो हि वैयाकरणाः वाक्ये पदानां सत्ता न, पदे वर्णानां सत्ता नास्ति इति प्रतिपादयन्ति। यदि पदसमूहो वाक्यं वा वर्णसमूहो पदमिति प्रतिपादयामः तर्हि वर्णेष्वपि अणुः, अणोरपि परमाणुः एतेषां सर्वेषां खण्डांशानां सत्ता स्वीकर्तव्या एव। परन्तु अनेन अस्य क्रमशः उच्चारणेन एकस्य वर्णस्य वा पदस्य उपस्थितिः न सम्भवति। एतादृश्यां स्थितौ कः अर्थवाचकः भविष्यति। अतः वैयाकरणाः शब्दम् अर्थं च अविभक्तरूपेणैव प्रतिपादयन्ति।

एवं रूपेण स्फोटनिरूपणानन्तरं नागेशः परमलघुमञ्जूषायां प्राकृतवैकृतध्वनी निरूपयन् जात्यादि अष्टविध-स्फोटात्मकः शब्द एव वृत्त्याश्रयो भूत्वा अर्थबोधं कारयति इति विशदं प्रतिपादयति।

## सन्दर्भग्रन्थसूचिः

१. अवस्थी, शिवशंकर, **वाक्यपदीयं वृत्त्या संवलितम्**, चौखम्बा विद्याभवन, वाराणसी, २००६

२. शास्त्री, कपिलदेव, **वैयाकरणसिद्धान्तपरमलघुमञ्जूषा**, कुरुक्षेत्र विश्वविद्यालय प्रकाशन, १९७५

३. शास्त्री, माधव, **वैयाकरणसिद्धान्तलघुमञ्जूषा,** चौखम्बा संस्कृत सिरीझ, वाराणसी, १९८९

४. पाण्डेय, रामज्ञ, **व्याकरणदर्शनभूमिका**, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, १९८२

५. शास्त्री, चारुदेव, **व्याकरण-महाभाष्यम्,** मोतीलाल बनारसीदास, दिल्ली, वि. सं.२०२५

६. शास्त्री, धर्मेंद्रनाथ, **न्यायसिद्धान्तमुक्तावली,** मोतीलाल बनारसीदास, दिल्ली, १९८५

[१] भर्तृहरेः वाक्यपदीयम्-कारिकासङ्ख्या - ७२